শ্রীঃ
শ্রীমতে নিগমান্তমহাদেশিকায নমঃ
শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।
ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

শ্রী মেল্পপত্তূর্ নারাযণভট্টতিরি ৱিরচিতম্

# ॥শ্রীমন্নারাযণীযম্ ॥

## দশক - ২১

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using Bengali for TEX.

শ্রীঃ
শ্রীমতে কৃষ্ণায পরব্রহ্মণে নমঃ
শ্রীমতে রামানুজায নমঃ

# ॥শ্রীমন্নারাযণীযম্ ॥

## দশক - ২১

*জম্বূদ্বীপাদিষু ভগৱদুপাসনাপ্রকারৱর্ণনম্*

মধ্যোদ্ভৱে ভুৱ ইলাৱৃতনাম্নি ৱর্ষে গৌরীপ্রধানৱনিতাজনমাত্রভাজি।
শর্ৱেণ মন্ত্রনুতিভিঃ সমুপাস্যমানং সঙকর্ষণাত্মকমধীশ্বর সংশ্রযে ত্বাম্॥ ১ ॥

ভদ্রাশ্বনামক ইলাৱৃতপূর্ৱৱর্ষে
ভদ্রশ্রৱোভিরৃষিভিঃ পরিণূযমানম্।
কল্পান্তগূঢনিগমোদ্ধরণপ্রৱীণং
ধ্যাযামি দেৱ হযশীর্ষতনুং ভৱন্তম্॥ ২ ॥

ধ্যাযামি দক্ষিণগতে হরিৱর্ষৱর্ষে
প্রহ্লাদমুখ্যপুরুষৈঃ পরিষেৱ্যমাণং।
উত্তুঙগশান্তধৱলাকৃতিমেকশুদ্ধ-
জ্ঞানপ্রদং নরহরিং ভগৱন্ ভৱন্তম্॥ ৩ ॥

ৱর্ষে প্রতীচি ললিতাত্মনি কেতুমালে
লীলাৱিশেষললিতস্মিতশোভনাঙগম্।
লক্ষ্ম্যা প্রজাপতিসুতৈশ্চ নিষেৱ্যমাণং
তস্যাঃ প্রিযায ধৃতকামতনুং ভজে ত্বাম্॥ ৪ ॥

রম্যে হ্যুদীচি খলু রম্যকনাম্নি ৱর্ষে
তদ্বর্ষনাথমনুৱর্যসপর্যমাণম্।
ভক্তৈকৱতসলমমতসরহৃতসু ভান্তং
মতস্যাকৃতিং ভুৱননাথ ভজে ভৱন্তম্॥ ৫ ॥

ৱর্ষং হিরণ্মযসমাহ্বযমৌত্তরাহ-
মাসীনমদ্রি ধৃতিকর্মঠকামঠাঙগম্।

সংসেৱতে পিতৃগণপ্ৰৱৰোৰ্যমা যং
    তং ত্বাং ভজামি ভগৱন্ পৰচিন্ময়াত্মন্॥ ৬ ॥

কিঞ্চোত্তৰেষু কুৰুষু প্ৰিযযা ধৰণ্যা
    সংসেৱিতো মহিতমন্ত্ৰনুতিপ্ৰভেদৈঃ।
দংষ্ট্ৰাগ্ৰঘৃষ্টঘনপৃষ্ঠগৰিষ্ঠৱৰ্ষ্মা
    ত্বং পাহি ৱিজ্ঞনুত যজ্ঞৱৰাহমূৰ্তে॥ ৭ ॥

যাম্যাং দিশং ভজতি কিংপুৰুষাখ্যৱৰ্ষে
    সংসেৱিতো হনুমতা দৃঢভক্তিভাজা।
সীতাভিৰামপৰমাদ্ভুতৰূপশালী
    ৰামাত্মকঃ পৰিলসন্ পৰিপাহি ৱিষ্ণো॥ ৮ ॥

শ্ৰীনাৰদেন সহ ভাৰতখণ্ডমুখ্যৈ-
    স্ত্ৱং সাঙখ্যযোগনুতিভিঃ সমুপাস্যমানঃ।
আকল্পকালমিহ সাধুজনাভিৰক্ষী
    নাৰাযণো নৰসখঃ পৰিপাহি ভূমন্॥ ৯ ॥

প্লাক্ষেৰ্কৰূপমযি শাল্মল ইন্দুৰূপং
    দ্বীপে ভজন্তি কুশনামনি ৱহ্নিৰূপম্।
ক্ৰৌঞ্চেম্বুৰূপমথ ৱাযুমযং চ শাকে
    ত্বাং ব্ৰহ্মৰূপমপি পুষ্কৰনাম্নি লোকাঃ॥ ১০ ॥

সৰ্ৱৈৰ্ধ্ৰুৱাদিভিৰুডুপ্ৰকৰৈৰ্গ্ৰহৈশ্চ
    পুচ্ছাদিকেষৱৱযৱেষৱভিকল্প্যমানৈঃ।
ত্বং শিংশুমাৰৱপুষা মহতামুপাস্যঃ
    সন্ধ্যাসু ৰুন্ধি নৰকং মম সিন্ধুশাযিন্॥ ১১ ॥

পাতালমূলভুৱি শেষতনুং ভৱন্তং
    লোকৈককুণ্ডলৱিৰাজিসহস্ৰশীৰ্ষম্।
নীলাম্বৰং ধৃতহলং ভুজগাঙগনাভি-
    ৰ্জুষ্টং ভজে হৰ গদান্ গুৰুগেহনাথ॥ ১২ ॥

**********